## नवमः अनुच्छेदः

परोपकारः मानवसमाजस्य आधारस्तम्भः । परोपकारस्य भावनां विना जीवनस्य संचालनमति दुष्करम् । मानवजीवने अनेकानि कष्टानि आयान्ति । कदाचित् रोगी भवति, कदाचित् च दरिद्रः जायते । तस्य मनः दुःखितं भवति । एतस्यामवस्थायां सः सहायतामपेक्षते । सर्वे सहायतां न कुर्वन्ति ।

सज्जनेषु एव परोपकारस्य भावना भवति । दुर्जनाः मानवान् पीडयन्ति । सज्जनाः परोपकारं कुर्वन्ति । सज्जनानां सर्वस्वं लोकानां कल्याणाय भवति । ते निरक्षरान् साक्षरान् कुर्वन्ति । पथभ्रष्टान् सन्मार्गं प्रदर्शयन्ति । बुभुक्षितानां बुभुक्षां नाशयन्ति । सज्जनाः कष्टं न गणयन्ति । राजा शिविः कपोतस्य प्राणरक्षणाय निजशरीरस्य मांसमददात् । दधीचिः देवानां रक्षायै अस्थीनि अददात् । सप्तर्षयः चौरं रत्नाकरमुपदिश्य वाल्मीकिमकुर्वन् ।

परोपकारस्य एषा भावना प्रकृतौ चापि दृश्यते । नद्यः परोपकाराय वहन्ति । मेघाः परोपकाराय वर्षन्ति । वृक्षाः परोपकाराय फलन्ति । सूर्यः परोपकाराय प्रकाशं ददाति । अतः उचितमेवमुक्तम् ।-

परोपकाराय सतां विभूतयः ।

### प्रश्नाः

1. **एकेन वाक्येन संस्कृतभाषया मातृभाषया वा उत्तरं लिखत ।**

(क) मानवजीवने कानि आयान्ति ?

(ख) दधीचिः देवानां रक्षायै कानि अददात् ?

(ग) वृक्षाः किमर्थं फलन्ति ?

2. **एकेन पदेन संस्कृतभाषया मातृभाषया वा उत्तरं लिखत ।**

(क) के परोपकारं कुर्वन्ति ?

(ख) कथं नद्यः प्रवहन्ति ?

(ग) केषु परोपकारस्य भावना भवति ?

(घ) मानवसमाजस्य आधारस्तम्भः कः ?

●●●